

॥१॥सदर्हन्नंजिनंनत्वावीरंस्याद्वादनायकं॥सर्वदर्शनवाच्योर्थः संक्षेपेणनिगद्यते॥१॥दर्शनानिषडेवात्र समूल
भेदव्यपेक्षया॥देवस्तावत्वसेदेनज्ञातव्यानिमनीषिभिः॥२॥बौद्धंनैयायिकंसाख्यंजैनंवैशेषिकंतथाजै मि
नीयंचनामानिदर्शनानामभून्यहो॥३॥तत्रबौद्धमतेतावद्देवताकृगतःकिल॥चत्वारीआर्यसत्यानांदुःख
दीनांप्ररूपकः॥४॥दुःखंसमुदितिस्कंधास्तेचपंचप्रकीर्तिताः॥विज्ञानंदेवतास्कंधसंज्ञासंस्कारसं
पमेवच५॥पंचेंद्रियाणिरूपाद्याविषयापंचमानसं॥धर्मायतनमेतानिद्वादशायतनानिच॥६॥समुदेति
यतोलोकेरागादीनांगणोऽखिलः॥आत्मात्मीयसाबाह्यःसमुदयःसउदाहृतः॥७॥क्षणिकाःसर्वसं
स्काराइत्येवंवासनायकाँसमार्गदृहविशेयोनिरोधोनोक्षउच्यते॥८॥प्रमाणेद्वेचविज्ञेयेतथासो
गतदर्शने॥प्रत्यक्षमनुमानंचसम्यज्ञानंहिधायतः॥९॥प्रत्यक्षंकल्पनापोढमक्षजंतत्रबुध्यतां॥त्रि
रूपाल्लिंगिनोलिंगिज्ञानंत्वनुमानसंज्ञितं॥१०॥रूपाणिपक्षधर्मत्वंसपक्षेविद्यमानता॥विप
क्षेनास्तिताहेतोरेवंत्रीणिविदुर्बुधाः११॥बौद्धदर्शनवाच्यस्यसंक्षेपोयंनिवेदितः॥नैयायिकमतस्ये
दानीकथ्यमानोनिशम्यतां॥१२॥अक्षपादमतेदेवःसृष्टिसंहारकृच्छिवः॥विद्युन्नित्यैकसर्वज्ञोनित्यबुद्धि
समाश्रितः॥१३॥तत्वानिषोडशप्रमाणादीनितद्यथा॥प्रमाणंचप्रमेयंचसंशयश्चप्रयोजनंच
॥१४॥दृष्टांतोपपत्तिसिद्धांतोऽवयवास्तर्कश्चनिर्णयोवादोजल्पोवितंडाचहेत्वाभासा
श्छलानिच१४॥१५॥जातयोनिग्रहस्थानान्येषामेवंप्ररूपणा॥अक्षेपिलब्धिहेतुस्यात्प्रमाणंतच्च

तुर्विधं॥१६॥त्रिसिर्विशेषकं॥प्रत्यक्षमनुमानंचशाब्दंचोपमयासह॥तत्रेंद्रियार्थसंपत्तिरुत्पन्न
मव्यभिचारिच॥१७॥व्यवसायात्मकंज्ञानंव्यपदेशविवर्जितं॥प्रत्यक्षमनुमानंतुतत्पूर्वंत्रिविधंतवे
त्॥१८॥पूर्ववच्छेषवच्चैवदृष्टंसामान्यतस्तथा॥तत्राद्यंकारणात्कार्यमनुमानमिहोच्यते॥१९॥
यथा॥मेघैर्नभस्तलव्याप्ततमालसदृशत्विषः॥वृष्टीर्व्यभिचरंतीहनेवंप्रायाःपयोमुचः२०॥कार्यात्कारणानु
मानंयंत्रतच्छेषवन्मतंतथाविधनदीपूराद्देवोवृष्टोयथोपरि॥२१॥यच्चसामान्यतोदृष्टंतद्देवंगतिपूर्विका॥
पुंसिदेशांतरप्राप्तिर्यथास्यैपिसातथा॥२२॥प्रसिद्धवस्तुसाधर्म्यात्प्रसिद्धस्यसाधनं॥उपमानंसमा
ख्यातंयथागोर्गवयस्तथा॥२३॥शाब्दमाप्तोपदेशात्तत्प्रमाणमेवंचतुर्विधं॥प्रमेयंत्वात्मदेहार्थबुद्धींद्रि
यसुखान्विच॥किंकिमेतदितिसंदिग्धःप्रत्ययःसंशयोमतः॥२४॥प्रवर्त्ततेयदर्थित्वात्तत्तन्नुसाध्यंप्रयो
जनं॥२५॥दृष्टान्तस्तुसवेदैरविवादविषयोनयः॥सिद्धांतस्तुचतुर्वेदःसर्वतंत्रादिभेदतः॥प्रतिज्ञा
हेतुदृष्टान्तोपनयानिगमस्तथा॥अवयवाःपंचतर्कसंदेहोपरमेसतेत्॥२७॥यथाकाकादिसंपाता
त्स्थाणुतासावमत्रहि॥ऊर्ध्वसंदेहतर्कस्यांप्रत्ययोनिर्णयोमतः॥२८॥साचार्यैर्निश्चयेःपक्षःप्र
तिपक्षपरिग्रहात्॥सकथास्यसहेतुभिःस्यादसोवादउदाहृतः॥२९॥विजिगीषोःकथायातुजल्पा
त्यादिदूषणसंजल्पसाचितंकातुकप्रतिपक्षवर्जिता॥३०॥हत्वाभासाःप्रसिद्धाश्चछलंकपोनचोदकः
॥जातयोदूषणाभासाःपक्षादिदूष्यतेनयैः३१॥निग्रहस्थानमाख्यातंपरायेननिगृह्यते॥प्रतिज्ञाहानि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

संन्यास॥विरोधाविशेषतः॥४५॥नैयायिकमतस्यैषसमासःकथितोंऽजसा॥सांख्यानिरीश्वरमतस्यावतारमिदानींमयंमुच्यते॥४६॥सांख्यानिरीश्वराःकेचित्केचिदीश्वरदेवताः॥सर्वेषामपितेषांस्यात्सत्यानांपंचविंशतिः॥४७॥सत्वंरजस्तमश्चेतित्रेयंतावद्गुणत्रयं॥प्रसादोतापदैन्यादिकार्यैर्लिंगंक्रमेणतत्॥४८॥एतेषांयासमावस्थासाप्रकृतिरुच्यते॥प्रधानमव्यक्तमजाक्षोवाख्यानित्यस्वरूपिका॥तनःसंजायतेबुद्धिर्महानितियकोच्यते॥अहंकारस्ततोपिस्यात्सस्मात्षोडशकोगणः॥४९॥स्पर्शनं रसनंघ्राणंचक्षुश्रोत्रंचपंचमं॥पंचबुद्धींद्रियाण्यत्रतथाकर्मेंद्रियाणिच॥५०॥पायूपस्थंवचःपाणीपादाख्यानिमनस्तथा॥अन्यानिपंचरूपाणितन्मात्राणीतिषोडश॥५१॥रूपात्तेजोरसादापोगंधाद्भूमिस्वरान्तरः॥स्मृतिर्द्वाभ्यांस्मृतेर्वत्वंपंचसंख्यंस्यःपंचतत्वके॥५२॥एवंचतुर्विंशतितत्वसंख्यंसांख्यमतेप्रधाने॥अन्यत्कर्तृविगुणंकर्तृभोक्तात्वंपुमान्नित्यश्चिदस्युपेतम्॥५३॥पंचविंशतितत्वानिसंख्येयेवंसवंतिये॥प्रधानन्नरयोश्चात्रवृत्तिःसंबंधयोरिव॥५४॥प्रकृतिवियोगोमोक्षःपुरुषस्यबन्धेनेतरत्तयात्॥मातन्त्रितंचात्रप्रत्यक्षंतैर्गिकंगम्यं॥५५॥एवंसांख्यमतस्यापिसमासेनगदितोधना॥निनदर्शनसंक्षेपःकथ्यतेकविचारवान्॥५६॥निनेदोदेवतातत्ररागद्वेषविवर्जितः॥हतमोहमहाशत्रुःकेवलज्ञानदर्शनः॥५७॥करास्करेंद्रसंभूज्यःसद्भूतार्थप्रकाशकः॥कृतकर्मक्षयंकृत्वासंप्राप्तःपरमंपदं॥५८॥युग्मं॥जीवाऽजीवोऽतथापु

ण्यंपापंधर्माश्चजसंवरोऽनिर्बंधोऽविनिर्जराऽमोक्षौचैनवतत्वानितन्मते॥५७॥तत्रज्ञानादिधर्मस्योपदेष्टात्मान्॥शुभाशुभंकर्मकर्त्तासोऽस्यकर्मफलस्यच॥५८॥चैतन्यलक्षणोजीवोमश्चेतद्विपरीतवान्॥अजीवःसमाख्यातःपुण्यंतत्कर्मपुद्गलाः॥५९॥पापंतद्विपरीतंतुमिथ्यात्वाद्याःकषायहेतवः॥यस्तेबंधइतिविज्ञेयःआश्रवोनिनदर्शने॥६०॥संवरःस्यन्निरोधस्तुबंधोजीवस्यकर्मणः॥अन्योन्यानुगमात्मातुयःसंबंधोद्वयोरपि॥६१॥बद्धस्यकर्मणःशातोयस्तुसानिर्जरामता॥आत्यंतिकोवियोगस्तुदेहादेर्मोक्षउच्यते॥६२॥एतानिनवतत्वानियश्चैतेस्थिरावयः॥सम्यक्श्रद्धानयोगेनतस्यस्याच्चरित्रयोगयता॥६३॥तथातत्वपाकेनतस्येतत्रितयंभवेत्॥सम्यग्ज्ञानक्रियायोगाज्जायतेमोक्षसाधनं॥६४॥प्रत्यक्षंचपरोक्षंचद्वेप्रमाणेतथामते॥अनंतधर्मकंवस्तुप्रमाणविषयस्त्विह॥६५॥अपरोक्षतयार्थस्यग्राहकंज्ञानमीदृशं॥प्रत्यक्षमितरत्तेयंपरोक्षग्रहणक्षया॥६६॥येनोत्पाद्यव्ययध्रौव्ययुक्तंसदिष्यते॥अनंतधर्मकंवस्तुतेनोक्तंमानगोचरः॥६७॥जैनदर्शनसंक्षेपोऽयमेषगदितोऽनघः॥पूर्वापरपराघातोमत्रकापिनविद्यते॥६८॥देवतादिविषयोभेदोनास्तिनैयायिकैसह॥नैगमादिकालब्धेतुविद्यतेसौनिदर्शनात्॥६९॥द्रव्यंगुणस्तथाकर्मेत्यसामान्यंचषष्ठचतुर्थकविशेषसमवायौतुदशतत्वषकंतुतन्मते॥७०॥सत्रद्रव्येनवधाभूजलतेजोनिलोत्तरिक्षाणि॥कालदिगात्ममनोसिचगुणःपुनःपंचविंशतिधा॥७१॥सप्तरसगंधरूपाःस्पृष्टःसंख्याविभागसं

षट्०। योगोपरिमाणंचप्रथक्त्वंतथापरत्वापरत्वेच ॥६२॥बुधिःसुखदुखेछाधर्माधर्मप्रयत्नसंस्का
राः॥द्वेषस्नेहगुरुत्वेद्रव्यत्ववेगोगुणास्तेते॥६३॥उक्षेपणापक्षेपणाकुंचनंप्रसारणंगमनं॥
पंचविधंकर्मेतत्परापरेसुसामान्ये॥६४॥तत्रधरंसतारूंद्रव्यत्वाद्यपरमथविशेषस्तु॥निश्च
यतोनित्यद्रव्यवृत्तिर्नियतः॥६५॥यद्द्रव्यायुतसिद्धानामाधाराधेयसंबंधावानां॥संबंधइह
प्रत्ययहेतुःसेहिसवतिसमवायः॥६६॥प्रमाणंद्विधामीषांप्रत्यक्षंलिंगिकंतथा॥वैशेषि
कमतस्येषसंक्षेपःपरिकीर्तितः॥६७॥जैमिनीयास्तुनःप्राहुःसर्वज्ञादीन्विशेषणान्॥देवो न
ह्यस्तेकोसियस्यमानंवचोभवेत॥६८॥तस्माद्वेदोक्तियार्थीनांसाक्षाद्दुष्टरसावतःप्रेतोध
र्मस्यजिज्ञासाकर्तव्याधर्मोसाध्यतो॥६९॥नोदनालक्षणोधर्मोनोदनाहुक्रियांप्रति॥
प्रवर्तकंवचःप्राहुःसकामोऽग्नियथायुजत्॥७१॥प्रत्यक्षमनुमानंचशब्दंचोपमयासह॥
अर्थापत्तेरथाष्टौतेषट्प्रमाणानिजंमिनिः॥७२॥तत्रप्रत्यक्षमक्षाणांसंप्रयोगेसतांसति
आत्मनोबुद्धिजन्मेत्यनुमानलिंगिकंतथा॥७३॥शब्दंशब्दगुणंवेदंत्यमुपमांमनुकीर्तितं॥
प्रसिद्धार्थस्यसाधर्म्यादप्रसिद्धस्यसाधनं॥७४॥दृष्टाद्यनुपपत्यातुकल्प्यार्थस्यकल्पना॥क्री
यतेयद्बलेनासावर्थापत्तिरुदाहृता॥७५॥प्रमाणपंचकंयत्रवस्तुरूपेनजायते॥यत्सत्सत्तायबो

१ निषेधोवेदवाक्येऽस्योपयोगार्थत्वविनिश्चयः॥६५॥अतएवपुराकार्योवेदस्याध्ययनक्रमः॥ई४७४ ३

धार्थंतत्रतावत्प्रमाणता॥७६॥जैमिनीयमतस्यापिसंक्षेपोयंनिवेदितः॥एवमास्तिकानांकृतं
संक्षेपकीर्तनं॥७७॥नैयायिकमतादन्येतेरवैशेषिकैसह॥नमन्यंतेमतेतेषांपंचैवास्तिकवा
दिनः॥७८॥षट्दर्शनसंख्यातुपूर्यतेतन्मतेकिल॥जोकापितमतक्षेपकथ्यतेतेनतन्मत
जोकापितावदित्येवंनास्तिजीवोनिवृतिः॥धर्माधर्मौनविद्येतेनफलंपुण्यपापयोः॥
८०॥तथाचतन्मतंएतावानेवलोकोयंयावानींद्रियगोचरः॥सदेवकपदंपशब्दयद्दस्य
बहुक्रताः८१॥पिबस्वादुचबहूजोचनेयदीवंवरगात्रिनन्नते॥नहिसोरुगतंनिवर्त्तते स
मुदयमात्रमिदंकलेवरं॥८२॥पृथ्वीजलंतथातेजोवायुर्नूनंचतुष्टयं॥प्राधारोस्त्रिरेतेषां
मानंत्वक्षजमेवहि॥पृथ्यादिसूतसंहत्यातथादेहपरीणतेः॥मदशक्तिःकरांगेभ्यो॥य
द्वत्तद्वच्चिदात्मनैः८४॥तस्माद्दृष्टपथत्यागात्॥यदृष्टेप्रवर्त्तनंलोकस्यतद्विमूढत्वंचार्वा
कःप्रतिषेधदिरे॥८५॥साध्यवृत्तिर्नवृत्तिस्त्यांयाप्रीतिर्जीयतेजने॥निरर्थासामतेतेषांधर्म्मका
मात्यरोनहि॥८६॥जोकापितमतेप्येवंसक्षेपोयंनिवेदितः॥अस्तिधेयतात्पर्यात्यःपर्यालो
च्यःसबुद्धिभिः॥८७॥इतिषट्दर्शनसमुच्चयःसंपूर्णः॥चार्वाकोध्यक्षमेकंस्वगतकणक
जीवानुमानंसशब्दं॥नैवेतंपारमार्थःसहितचतुष्पात्रयंचाप्तपादः॥अर्थापत्त्याप्रसाद्धद

षट्॰१ निश्चनिखिलंमन्यतेसदृएतत्सासावंद्देप्रमाणेजिनपतिसमयेस्पष्टतोस्पष्टतश्च॥
॥ ॥संवत१९२०॥ ॥